# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय ९५

ततः प्रवृत्तं सुक्रूरं रामरावणयोस्तदा ।
सुमहद्द्वैरथं युद्धं सर्वलोकभयावहम् ॥ १ ॥

ततो राक्षससैन्यं च हरीणां च महद्बलम् ।
प्रगृहीतप्रहरणं निश्चेष्टं समतिष्ठत ॥ २ ॥

सम्प्रयुद्धौ ततो दृष्ट्वा बलवन्नरराक्षसौ ।
व्याक्षिप्तहृदयाः सर्वे परं विस्मयमागताः ॥ ३ ॥

नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः ।
तस्थुः प्रेक्ष्य च सङ्ग्रामं नाभिजघ्नुः परस्परम् ॥ ४ ॥

रक्षसां रावणं चापि वानराणां च राघवम् ।
पश्यतां विस्मिताक्षाणां सैन्यं चित्रमिवाबभौ ॥ ५ ॥

तौ तु तत्र निमित्तानि दृष्ट्वा राघवरावणौ ।
कृतबुद्धी स्थिरामर्षौ युयुधाते अभीतवत् ॥ ६ ॥

जेतव्यमिति काकुत्स्थो मर्तव्यमिति रावणः ।
धृतौ स्ववीर्यसर्वस्वं युद्धेऽदर्शयतां तदा ॥ ७ ॥

ततः क्रोधाद्दशग्रीवः शरान्सन्धाय वीर्यवान् ।
मुमोच ध्वजमुद्दिश्य राघवस्य रथे स्थितम् ॥ ८ ॥

ते शरास्तमनासाद्य पुरन्दररथध्वजम् ।
रथशक्तिं परामृश्य निपेतुर्धरणीतले ॥ ९ ॥

ततो रामोऽभिसङ्क्रुद्धश्चापमायम्य वीर्यवान् ।
कृतप्रतिकृतं कर्तुं मनसा सम्प्रचक्रमे ॥ १० ॥

रावणध्वजमुद्दिश्य मुमोच निशितं शरम् ।
महासर्पमिवासह्यं ज्वलन्तं स्वेन तेजसा ॥ ११ ॥

जगाम स महीं भित्त्वा दशग्रीवध्वजं शरः ।
स निकृत्तोऽपतद्भूमौ रावणस्य रथध्वजः ॥ १२ ॥

ध्वजस्योन्मथनं दृष्ट्वा रावणः सुमहाबलः ।
क्रोधजेनाग्निना सङ्ख्ये प्रदीप्त इव चाभवत् ॥ १३ ॥

स रोषवशमापन्नः शरवर्षं महद्वमन् ।
रामस्य तुरगान्दिव्याञ्शरैर्विव्याध रावणः ॥ १४ ॥

ते विद्धा हरयस्तस्य नास्खलन्नापि बभ्रमुः ।
बभूवुः स्वस्थहृदयाः पद्मनालैरिवाहताः ॥ १५ ॥

तेषामसम्भ्रमं दृष्ट्वा वाजिनां रावणस्तदा ।
भूय एव सुसङ्क्रुद्धः शरवर्षं मुमोच ह ॥ १६ ॥

गदाश्च परिघांश्चैव चक्राणि मुसलानि च ।
गिरिशृङ्गाणि वृक्षांश्च तथा शूलपरश्वधान् ॥ १७ ॥

माया विहितमेतत्तु शस्त्रवर्षमपातयत् ।
सहस्रशस्ततो बाणानश्रान्तहृदयोद्यमः ॥ १८ ॥

तुमुलं त्रासजननं भीमं भीमप्रतिस्वनम् ।
दुर्धर्षमभवद्युद्धे नैकशस्त्रमयं महत् ॥ १९ ॥

विमुच्य राघवरथं समन्ताद्वानरे बले ।
सायकैरन्तरिक्षं च चकाराशु निरन्तरम् ।
मुमोच च दशग्रीवो निःसङ्गेनान्तरात्मना ॥ २० ॥

व्यायच्छमानं तं दृष्ट्वा तत्परं रावणं रणे ।
प्रहसन्निव काकुत्स्थः सन्दधे सायकाञ्शितान् ॥ २१ ॥

स मुमोच ततो बाणान्रणे शतसहस्रशः ।
तान्दृष्ट्वा रावणश्चक्रे स्वशरैः खं निरन्तरम् ॥ २२ ॥

ततस्ताभ्यां प्रयुक्तेन शरवर्षेण भास्वता ।
शरबद्धमिवाभाति द्वितीयं भास्वदम्बरम् ॥ २३ ॥

नानिमित्तोऽभवद्बाणो नातिभेत्ता न निष्फलः ।
तथा विसृजतोर्बाणान्रामरावणयोर्मृधे ॥ २४ ॥

प्रायुध्येतामविच्छिन्नमस्यन्तौ सव्यदक्षिणम् ।
चक्रतुस्तौ शरौघैस्तु निरुच्छ्वासमिवाम्बरम् ॥ २५ ॥

रावणस्य हयान्नामो हयान्नामस्य रावणः ।
जघ्नतुस्तौ तदान्योन्यं कृतानुकृतकारिणौ ॥ २६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com